M. T. B. COLLEGE, SURAT

Manuscripts Library

No Ref.
Ser. 1422

Title : Prayoga Ratna

1422

InComplete

C

	Prayoga Ratna		Title
		Narayan Bhatt Son of	Author
		Rameshwar Bhatt	Editor
			Year, Vols.
SRC			Publisher
1422			Remarks

29/11/51

पाणिनास्पृशन् पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः
सर्वमसि सर्वं मे भूयाः अक्षितिरसि मा मे क्षेष्ठा इति जपित्वा कुशाग्रैः प्रागादि पंचदिक्षु ज
लं मंत्रैर्यथालिंगं सिंचेत् ते च मंत्राः प्राच्यां दिशि देवा ऋत्विजो मार्जयंतां दक्षिणस्यां दि
शि मासाः पितरो मार्जयंतां प्रतीच्यां दिशि गृहाः पशवो मार्जयंतां उदीच्यां दिशि अप
ओषधयो वनस्पतयो मार्जयंतां ऊर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयंतां मि
त्येकश्रुत्या यद्वन्यति दिशां सित्का कुशाग्रैः स्वशिरसि मार्जयेत् ते च मंत्राः आपो अस्मानि
त्यस्य देवश्रवा आपस्त्रिष्टुप् मार्जने विनियोगः आपो अस्मान्मातरः शुंधयंतु घृतेन नो

प्र०
८१

ष्टतवः पुनंतु विश्वंहिरीप्रमवहंति देवीरुदिदाभ्यःशुचिरापूत एमि इदमापः सिंधुद्वीप
आपोनुष्टुप् मार्जने विनियोगः इदमापःप्रवहत यत्किंच दुरितं मयि यद्वाहमभिदुद्रो
हयद्वाशेपउतानृतं सुमित्रान आपओं षधयः संतु इत्यनेन मंत्रमार्जनं कृत्वा दुर्मित्रास्त
स्मै संतु योअस्मान्द्वेष्टि यंचवयंद्विष्म इति निर्ऋतिदेशे कुशाग्रैः अपः सिंचेत् ततोब्र
ह्माय जमानवामपार्श्वे स्थितपत्न्यंजलौ पूर्णपात्रस्थं जलं ओं माहं प्रजां परासिचया
नः सयावरिस्य नसमुद्रे वोनिनया नि स्वं पाथोअपीथेति मंत्रमेकं श्रुत्वा पत्न्या वाच रा० ८१
यन्स्वमंपव्यन्प्रत्यग्भुस्वंनिशिंच्यांजलिस्थजलैः पापापनोदार्थमात्मानंपत्नींच

प्रोक्षयेत् पत्नीतजलं बर्हिःषु निषिंचेत् अथवा यजमानः स्वस्ववामपाणिवृत्तानेबर्हि
षि निधाय तत्र दक्षिणपाणिना पूर्णपात्रमादाय माहं प्रजामित्यनेनतज्जलंतत्स्रुव
निषिंच्य नो आपः समुद्रंगच्छंतीति ध्यात्वा पाणिस्थजलैरात्मानं पत्नींच प्रोक्षयेत् ततः
कर्नीग्नेवायव्ये स्थितः संस्राजपेनोपतिष्ठेत् नयथा अग्नेत्वंनइति चतसृणां गोपाय
नालौपायनाबंधुः सुबंधुः श्रुतबंधुः विप्रबंधुः श्चैकऋषयः अग्निर्देवता विराट् छंदः
अग्न्युपस्थाने विनियोगः ओं अग्नेत्वंनो अंतम उतत्राता शिवोभवावरूथ्यः वसुरग्निर्व
सुश्रवा अच्छानक्षि द्युमत्तमं रयिंदाः सनोबोधिश्रुधिहवमुरुष्याणो अघायतः सम

प्र० स्मार्त तन्त्वाशेशाविद्वदादिमूल सुन्नायतन्नमीमहे सखीभ्यः ॐ च मे स्वरश्च मे यज्ञोप
८२ चनेन मश्च यजेन्द्रनं तस्मै नेउपयन्तेनारकं तस्मै तेन नमः अग्नये नमः स्वस्ति श्रद्धां मे
धां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलं आयुष्यं तेज आरोग्यं देहि मे हव्यवाहनः देहि मे ह
व्यवाहनोन्नमोन्नमः ततो ब्रह्मा पितन्ये वस्थित्वा एतैरेवोपतिष्ठेत ततः कर्ता आचा
रात् मानस्तोके कुत्सो रुद्रो जगती विभूतिग्रहणे विनियोगः ॐ मानस्तोके तनये
मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः वीरान्मा नो रुद्र भामितो वधीर्हविष्मंतः
सदमित्वा हवामहे इति भुवविनष्टेन विभूतिं गृहीत्वा ॐ त्र्यायुषं जमदग्नेरिति ल राम ८२

लाटे कश्यपस्य त्र्यायुषमिति कंठे अगस्त्यस्य त्र्यायुषमिति नाभ्यां यद्देवानां त्र्यायुषमिति
दक्षिणस्कंधे तन्नो अस्तु त्र्यायुषमिति वामस्कंधे शतायुषमिति शिरसि धारयेत् के
चित्तोपस्थानात्पूर्वं विभूतिग्रहणमाहुरिति ततः कर्त्ता परिस्तरणानि विसृज्याग्निं प
रिसमुह्य पाराप्रच्छाविश्वानि नरत्वचं पित्वा पुष्पादिभिरलंकृत्य नैवेद्यं च तांबूलं च नि
वेद्य ब्रह्मणे यथोक्तदक्षिणां दक्षिणाभावे हुतशेषं घृतादि हिरण्यं दत्त्वा ब्रह्माभावेन्य
स्मै ब्राह्मणाय पदत्वा पात्राणि प्रक्षाल्य पूर्वक्रमेण द्वंद्वशः उत्सृज्य प्रस्तरस्यात्तिश्री विष्णु
नत्वा चमस्य धन्तरा विचरयं थि विस्वस्य शुद्धदेशे क्षिपेत् दर्शे तु अग्निषोमस्थाने इंद्राग्नी

प्र० इतरत्सर्वं समानं नक्षत्रदर्शनमेव सद्यस्कालायां पौर्णमास्यां प्रागन्त्योरुभयत्रवा यागादि
८३ नत्वग्न्याधानहोमानंतरमन्वाधानं पेध्मापेध्मा बर्हिर्वासंनह्य इष्टिप्रयोगं कुर्यात् ॥ ॥इ
ति श्रीमद्दिव्यमुकुन्दमाणिक्यप्रभाभट्टरामेश्वरसूनुनारायणभट्टविरचिते प्रयोगर
त्ने पार्वणस्थालीपाकप्रयोगः समाप्तः ॥ ॥अथेष्टिप्रायश्चित्तानि । प्रमादाद्दन्वा
ग्नौ चेत्स्वयं प्रजेत्स्वाग्नावन्यो वा प्रणयेत् चेत् तथा प्रायश्चित्तं पथिकृद्ध्वरुहोमं कृत्वा
पुनस्तृतीयादितिथिष्वन्वाधानपूर्वकमिष्टिं कुर्यात् अथातिपन्नेष्टिप्रयोगः अन्वा राम
धानात्पूर्वं बलात्स्वत्वलाभवतित दा पंचमादिदिवसे सद्यस्कालान्वाधानपूर्वकं जुहु ८३

यात् तास्वप्यतिक्रमेऽनंतरे पर्वणि पथिकृद्यागपूर्वकमतिपन्नयागं कृत्वा तत्सर्वेणान्वा
धानं कुर्यात् तत्राप्यतिक्रमेऽतिपन्नस्य पादकृच्छ्रप्रायश्चित्तं कृत्वा कालप्राप्तं प्रतिपदि
इष्टिं सद्यस्कालान्वाधानं कुर्यात् द्वितीयपर्वातिक्रमे पूर्ववदागामिपर्वमध्ये कुर्यात्
तत्राप्यतिक्रमे तृतीयपर्वपर्यन्तमतिपन्नद्वयं प्रायश्चित्तं कृच्छ्रार्द्धं चरित्वा प्राप्तकाला
मिति कुर्यात् तस्याप्यतिक्रमे आगामिपर्वपर्यन्तं पूर्वोक्तवत्कुर्यात् तत्राप्यतिक्रमे स्मा
र्तोऽग्निर्नश्यतीति तेन विधिना पुनः संधानं कृत्वा अन्वाधानेष्टिमध्ये चंद्रग्रहणं चेद्दृष्टि
दिने हविरासादनानंतरं कृत्वा अन्वाधानेष्टिमध्ये चंद्रग्रहे प्रायश्चित्तार्थमाज्यहोमं कार दोष

प्र०र०
८४

ष्यइतिसंकल्प्यनवोनवोभवतीत्यस्यसूर्यासावित्रीचंद्रमास्त्रिष्टुप् ॐनवोनवोभवति
ॐयमादित्याअंशुमाप्याययंतियमक्षितमक्षितयःपिबंति तेननराजावरुणोबृहस्प
तिराप्याययंतुभुवनस्यगोपाः आज्यादेवकृतात्येनेवाहुतीहुत्वाअन्यंलंकरणादि
तंत्रंकुर्यात् सूर्यग्रहणंचेद्धविरासादनांतेतिस्रआज्याहुतयः नाभ्रचित्रंदेवानामित्य
स्यांगिरसःकुत्सस्त्रिष्टुप् ॐचित्रंदेवानां उदत्यंजातवेदसमित्यस्यकांण्वःप्रस्कण्वःसू
र्योगायत्री उदत्यं उद्वयमित्यस्यकाण्वःप्रस्कण्वःसूर्योऽनुष्टुप् ॐउद्वयंतमसः ए
तैर्हुत्वाएतैर्हुत्वाअन्यलंकरणादितंत्रशेषंसमापयेत् इदंप्रयोगपारिजातेसंग्रहे। राम
८४

क्तंपापश्चिन्नंग्रंथांतरेतुशौनकोक्तमुक्तं तद्यथा इष्टिादनेहविरासादनांतेकृतेऽन्वाधा
नेइष्टिमध्येचंद्रग्रहणाजनितवैगुण्यपरिहारार्थंशौनकोक्ताआज्याहुतीरुपस्थानंचक
रिष्यइतिसंकल्प्यअत्राहगोरित्यस्यराहुगणोगौतमश्चंद्रमागायत्री इष्टिमध्येचंद्रग्रह गा
णवैगुण्यपरिहारार्थमाज्यहोमेविनियोगः ॐअत्राहगोरमन्वतनामत्वष्टुरपीच्यं
इत्थाचंद्रमसोगृहेस्वाहाचंद्रमसइदंनमम: नवोनवइत्यस्याःसूर्यासावित्रीचंद्रमा
स्त्रिष्टुप् चंद्रोपस्थानेविनियोगः ॐनवोनवो०मायुः सूर्यग्रहेतुसंकल्प्यादौचंद्रप
दस्थानेसूर्यपदंप्रयोक्तव्यं उद्वयमित्यस्याःकण्वःप्रस्कण्वःसूर्योऽनुष्टुप् उद्वयंतम

प्र॰ सः स्वाहा सूर्यायेदं न मम चित्रमित्यस्य कुत्सः सूर्यस्त्रिष्टुप् सूर्योपस्थाने विनियोगः
८५ चित्रं देवाना॰ इति इष्टिमध्ये ग्रहणे निर्णयः अन्वाधाने ष्टिमध्ये ग्न्यनुगतौ अया
श्चेति मंत्रेण वक्ष्यमाण वस्तुनः संधानं कृत्वा ॐ भूर्भुवः स्वः स्वाहेति मंत्रेण संकल्प
पूर्वकं प्रायश्चित्तं संस्कृताज्येन हुत्वा पुनरन्वाधान पूर्वकमिष्टिं कुर्यात् अन्वाधा
ने ष्टिमध्ये प्रयाणे पास्यनो तुभ्यं अंगिरस्तमिति संकल्प पूर्वकं संस्कृताज्यं हुत्वा अरण्या
दिषु समारोप्य होमकाले प्रतिष्ठाप्य प्रातर्होमपूर्वकमिष्टिं कुर्यात् अन्वाधाय प्रतिप
दि अमावास्यादिष्वाकरणे त्वतीयादिति पशुप्रातरौपासने चे रसं संकल्प पूर्वकं संस्कृताज्य राम

८५

व्यस्त समस्त व्याहृतिभिर्हुत्वा पुनरन्वाधान पूर्वकं कुर्यात् अथ यस्मिन्ग्रामादौ वने मित्तकर्मा
यश्चित्तान्युच्यन्ते शम्यापरिमितदेशादर्वाग्बहिरायतनादुत स्वेदग्निः भवति प्रायश्चित्तं स
मास्तिपर्यंतास्याग्नियोग्यस्तदा इदं तदेकं परकृतम् एकं त्वनायेन ज्योतिषा संविशस्व संवे
शनेन त्वा अश्वा हरेथि प्रियो देवानां परमं जनित्रे इति मंत्रेणायतने प्रक्षिप्य व्याहृतिभि
राज्याहुतिं जुहुयात् तमरिकां अग्नीम्स्व स्यापरा शालुब हिरायतनाहुतं प्रायश्चित्तं समा
ख्यातं समभ्योनी विनुं यदि इदं न इत्स्वाना यस्याग्ने ग्निं प्रक्षिप्य पुनः आज्याहुतिभ्र्जुहुया
द्याहृत्या व्येश्च पूर्ववत् शम्याः षट्त्रिंशदंगुलेत्यापस्तंबः शम्याः परिमितदेशाद्बहिर

प्र० ८६

यताद्धनेऽग्नेः पथिकृदग्नये चरुं निर्वपेत् अशक्तौ द्वादशगृहीतेनाज्येन स्रुचं पूरयित्वा
अग्नये पथिकृते स्वाहेति पूर्णाहुतिं जुहुयात् स्रुवाहुतिं वा तदुक्तं कारिकायां अनिष्ट्वा
नोपदाशभ्यां परास्तमनले भवेत् चरुः पथिकृते कार्यः पूर्णाहुतिरथापि वा पूर्णाहु
तिलक्षणं कारिकायां उक्तं अन्यं द्वादशकृत्वस्तु गृहीत्वा पूरयेत्स्रुचं तया वाज्याहुतिः
कार्या सा पूर्णाहुतिरिष्यते स्रुव पूर्णाहुतिर्वा स्यादित्येके याज्ञिका विदुः यद्यग्निः स्वयं ज्वलति
तदा उद्दीप्यस्व जातवेदोपघ्नं निर्ऋतिं मम पशूंश्च मह्यमावह जीवनं च दिशो दश मा नो हिंसी
ज्जातवेदो गामश्वं पुरुषं जगत् अबिभ्रदग्न आगहि श्रिया मा परिपातय इति मंत्राभ्यां स राम ८६

मिद्द्वयमग्नावादध्यात् अग्नेश्च मलमूत्राद्युपघाते पुनस्त्वादित्या रुद्रा वसवः समिंधतां पु
नर्ब्रह्माणो वसुनीथ यज्ञैः घृतेन त्वं तन्वं वर्धयस्व सत्याः संतु यजमानस्य कामा इति समि
धमादध्यात् तदुक्तं कारिकायां स्वयं जलेद्युदीप्यस्वेति द्वाभ्यां समिद्द्वयं आधेयमुपघा
ते तु पुनस्त्वेत्यनया समित् हूयमानाहुतिर्यदि वाहः स्वधेनं देवां जनमित्यनेन तामभि
मंत्र्य पद्मसम्भ स्कंदेत्याज्याहुतिं जुहुयात् व्याहृतिभिश्च ततः स्कन्नमनले क्षिपेत् मंत्रेण च देवा
जनमगन्यज्ञस्त्वस्य माशास्वनुवर्धतां भूमिर्धृतेन मुंचतु यज्ञोयज्ञपतिमंहसं भूपतये स्वा
हा भुवनपतये स्वाहा भूतानां पतये स्वाहा यज्ञस्य त्वा प्रमयोन्मया अभिमया प्रतिमया ६

प्र. स्रुवस्कंदप्रमिमाअनु धुनिमंत्रयोानगनुपश्चपूर्व. समानंयोनि तु संचरंतं दक्षं तु होम्यनु
८१ सह होताः अन्नकारिका आहुतीईमनानात्वहिःस्कंदने भेगत देवांजनुनयन्यत नयने
नाभिमृश्यनां इत्यथो याहुतिं हुत्वा प्रक्षिपेदजले तु नः देवांनने कन्नंप्रक्षिमृशे
द्वावि: होतव्याःप्राहुतिस्कंभमाहु याज्ये:समुद्रपार यागःस्यागन्वाधान निर्वापादि
युजानोदेवतानुक्रमो यदाना स्कंदाप्याहुतिमिंदु वा विहितदेवतां याणादूर्ध्वं
देवतानुक्रमस्थानैतु व्याहृतिभि हुत्वा तं यागं नावर्तयेत् अन्नकारिका प्राप्य यागाद्युक्रमो
ल्लानं इदं कृत्वा यजेत्तदा अविज्ञाने विपर्यासो वा हितां देवतां स्मरन् एतत्र्या ऊर्ध्वं यु राम ८१

क्रमाद्यागमेसति प्राप्यश्चिताभिदं कृत्वा यागं नावर्तयेत्तदा यदात्वविहितां कांचिद्देवता
मिष्ट्वा स्रुवं प्रायश्चित्ता । इदं कृत्वा यागमावर्तयेत्कृतं इदं व्याहृति होमाख्यं अन्यो
न्यप्रायश्चित्तानिकारिकायां। यत्रचंद्रादनश्चैव वरुः यदा हविरप
स्यात्तेन बहुवि प्राप्यजेत् चतुःशरावमात्रं तु पचेद्ब्राह्मणोदनं भोजयेत्तेन चान्नेन चतु
रो ब्राह्मणानथ बहु दग्धमदग्धं वा किंचिद्दग्ध यदा हवि: शिष्टेन ब्राह्मणान यागःस्यादारभ्या
दितस्तदा स्वल्पं दग्धं यदा तत्स्यात् पदहवि: नमेव यागः कर्तव्यः पुनर्यागस्तु ने
ष्यते मध्यात्पूर्वार्धतो वत्तं यादद्वात् नैवेद्य तस्यैव हविषोवद्ये मध्यात्पूर्वार्धतः पुनः

प्र०

८८ इध्माधानेकृतेदुष्टंप्रधानहविरन्यचेत् तत्स्थानेजुहुयादाज्यमदुष्टंचजुहोत्यथः एवंसमाप्य
यदुष्टंतदप्सुप्रक्षिपेत्पुनः अन्वाधानादिकोयागः पुनःकर्तव्यएवतु प्रागिध्माधानतोदु
ष्टेप्रधानहविषित्वथ तद्धविःपुनरुत्पाद्य पूर्ववत्तत्समापयेत् अंगानांचेद्धविर्दुष्टंतदप्सु
प्रक्षिपेत्पुनः स्विष्टकृद्धविषोदोषाआज्येनैवसमापयेत् प्रच्युतस्तुनरैर्वेकेशकीटैर्वा
मेध्यसेविभिः वसासृक्शुक्रमज्जास्थिमूत्रविट्स्वेददूषकैः श्लेष्माद्यैरपिवाभिस्तैर्दुष्टा
निस्युर्हवींषिचेत् भिन्नानिचैवसिक्तानिदुष्टानिस्युःक्षिपेज्जले स्रुक्स्रुवेद्वितीयेनमर्घन्या
गाहृत्वाजुहुयाद्धविः वनस्पत्यानिभिन्नानिप्रागंडात्यानलेक्षिपेत् अन्यथाप्सुविसंवं राम ८८

धंमृन्मयंभिन्नमेववा भूमिर्भूमितुमंत्रेणप्रक्षिपेद्देवतज्जले मंत्रः भूमिर्भूमिमगान्मातामा
तरमप्यागमत् भूयास्मपुत्रैःपशुभिर्योनोद्वेष्टिसभिद्यतामिति संसृष्टोयस्यगृह्याग्निरन्य
गृह्याग्निनायदि चरुर्विविचयेकार्योयद्वापूर्णाहुतिर्भवेत् अग्निर्गुणाभवेदेषुविविवि
न्वादिकोगुणः चरुःक्षामायकर्तव्योगृहदाहेषुवैभवेत् शावाग्निनातुसंसर्गेकुर्वीतश्र
पयेच्चरुं पचनाग्नेस्तुसंसर्गेसंवर्गायचरुर्भवेत् वैद्युतेनतुसंसर्गेकुर्यादप्सुमतेचरुं
प्रायश्चित्तचरुस्थानेवापूर्णाहुतिरिष्यते पर्वण्यात्याभ्रुपातेनकुर्यात्तनमनेचरुं
पर्वणिग्नलोपेतुकुर्यादृतपतिंचरुं समानतंत्रंकुर्वीतपार्वणेनतुकर्मणा अग्न्यनाग्र

प्र०
८९

यणाभ्नीयान्नवान्नेयस्तुवैधुनः वैश्वानरायकर्त्तव्यमन्त्रस्तःपूर्णाहुतिःस्रुवा द्विपदन्नंयदाभुंक्ते
नत्रापोषचरुर्भवेत् कपालनाशेपि[illegible]स्याद्ध्रुवणाकर्मनामनि कपालंतद्भवेद्भिन्नंप्रागेवस्य
वणापादि तदामंत्रोक्तमंत्रेणकपालंसंधयात्तथा अभिनोधर्मरत्याभ्यामस्तुनत्येक्षिपेद्य
था नश्येदशुचिसंवर्द्धामाभ्यामेवक्षिपेज्जले भिद्येद्यादिपुरोडाशउक्तद्देदग्धवापदि कि
मुत्पतसिमंत्रेणबार्हिष्येनंनिधायतु अभिमंत्रयतेतंनुमाहिंसीरिति मंत्रतः श्रूयतेमत
शादश्वेयजमानेतु[illegible]वति अग्नयेसुरभिमतेचरुःपूर्णाहुतिस्तुर अथयस्यवधूर्गौर्वाज
नयेद्येयमोनतः स[illegible]कुर्यात्पूर्णाहुतिमथापिवा समारूढसमिन्नेशेपुनराधेय राम ८९

ष्यते श्रौतोक्तामविरोधेनान्यमन्यंतुशात्वशास्त्रवित् प्रायश्चित्तविशेषंस्यपत्नीनोक्तंभवेद्धविः
होतव्याज्याहुतिस्तत्रभूर्भुवःस्वरितिहेतु निमित्तानंतरंसर्वंप्रायश्चित्तंभवेदिह प्रागेवोत्पद्य
दोषआज्यसंस्कारतोयदि प्रायश्चित्तंभवेदाज्यसंस्कारानंतरंतदा व्युत्क्रमोदेवतानांतुसंक
ल्पादौभवेद्यदि मंत्राणांव्युत्क्रमस्तद्वद्धोमादौतुभवेद्यदि मध्यान्तर्वार्धनाश्चेतिव्युत्क्रमो
स्यभवेद्यदि द्रव्याणांव्युत्क्रमःस्याच्चेत्तथानिर्वापणादिषु यद्यदेवात्रचात्रत्ताजुहुयात्तु
स्रुवाहुतिं पत्न्युत्थंस्वगृहेद्व्यहोमकर्त्रैददातितत् यजमानस्तुजुहुयाद्दूलाभावेस्रुवा
हुतिं कस्मैचिद्दूलणायास्मिपक्षेद्व्यंददातितत् होतव्येकाहुतिश्चात्रव्याहृत्याखेःसमु

प्र०
८० अथाह सर्वत्रैव प्रायश्चित्तरूपं जपहोमं वा आलस्येन कुर्यात् जुहोति जपतीति प्रायश्चित्ते ब्रा
ह्मणमिति सत्त्वरूढ उक्तेः तदभावे तु यजमानसमानत्वापत्त्वात् यत्र स्वकाले ख कर्माकरण
निमित्तं प्रायश्चित्तमुक्तं यस्मिन्प्रायश्चित्ते कृते नैमित्तिकं कर्म कार्यं न वेति मतभेदः तदुक्तं कार
कायां प्रायश्चित्ते कृते पश्चादतीतमपि कर्म वै कार्यमित्येक आचार्यास्तेन्ये तु विपश्चितः
कर्मसमाप्तिसमये गलोपे हाते अहानेवाङ्गलोपे प्रजापतिः प्रायश्चित्तमाह प्रमादात्कुर्व
तां कर्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः एवमन्योन्यापि प्रा
यश्चित्तानि ग्रंथांतरतो वा गंतव्यानि   इति श्रीमद्भट्टरामेश्वरसूनुनारायणभट्टविरचिते राम
८०

प्रयोगरत्ने दृष्टप्रायश्चित्तानि नैमित्तिकप्रायश्चित्तानि च   अथ सकलकर्मसाधारणप
रिभाषा तत्र कारिका आज्येकद्रव्यके होमे स्याद्द्वेदाज्यपरिग्रहः स्यात्परिस्तरणं तत्र कृ
तकृतमिति स्थितिः नोपस्थानं पात्र आज्यं पदं कर्मसु स्त्रुवः कृते अनादिष्टाज्यहोमे पुनर्न
नित्यापरिस्तरितिः सर्वत्र्यंबकपक्षं तु आज्यभागौ कृताकृतौ सर्वत्र पाकयज्ञे तु भवेत् कृता
कृतानि धन्वंतरिमखे ब्रह्मा नित्यः स्यात् गवे तथा कृते होमं कश्चिन्नाकं चिन्मंत्रेणस्त्र
कृत् नोभयं पत्र नत्र हुतं दवनं नामधेयतः नैकेकांचनपक्षेपि बोलाहावाग्निनोपदा
तदाग्निरिंद्र इत्याघारो होतव्यारति इत्तिकृत अनेकपाकपक्षाः स्युरेकस्मिन्कालयेवतु

प्र. ६१

समानतंत्रकाः कार्येन तंत्रावृत्तिरिष्यते पात्रासादनमिध्मानमाज्यादिश्रपणादि च स्रुवा
दिमार्जनं वेध्मरज्जुप्रहरणं तथा पूर्णपात्रनिनयनमाज्यस्योत्पवनं तथा द्रव्यानादेश
आज्यं स्यादनुक्ते साधने स्रुवः जपानुमंत्रणे मंत्र उपस्थानाभिमंत्रणे मंत्रोपः कर्मकरणे ग
द्यकर्मण्युपांशुवत् इदं कार्यमनेनेति न क्वचिदृश्यते विधिः लिंगादेवेदमर्थत्वं येनोतेमं
त्रलिंगिनाः मंत्रांते कर्म कर्तव्यं मंत्रस्य करणत्वतः कर्मादित्वोत्तु मंत्रस्याप्यावृत्तिर्गृह्यक
र्मणि मंत्रोक्तदेवतानां तु तत्स्थाने वाथ निर्वपेत् चतुरश्चतुरो मुष्टीन्प्रोक्षणं च तथा भवेत् ८
सर्वैर्देवश्रपयेत्तत्र नान्यल्लिङ्गमुद्धरणं तथा आदिष्टमंत्रहोमे तु सर्वत्रैवं विधायनामिति कृता

कृतं वैकल्पिकं ऊचुरिति गृह्यसूत्रकारः क्वचिन्नाम्ना होममाह यथा सावित्र्यै ब्रह्मण इति
क्वचिन्मंत्रेणाह यथा अग्ने नय सुपथा राये अस्मानिति च तत्स्थानिरिति यत्र तु न नामतो न
वा मंत्रतो होम उच्यते केवलं तद्धिताद्धिना देवतानिधानं यथाग्नाजापत्यस्य स्थालीपाक
स्य हुत्वा काम्याश्चरूनित्यादौ तत्र चतुर्थ्यन्तेन देवतानाम्ना होम इत्यर्थः अनेक इति यथा
आग्रयणाश्वयुजीकर्मणी यत्राश्वयुज्यां क्रियते तत्र तयोरेकालतः जपेति जपादिषु यद्य
स्त्रीयो मंत्र उक्तस्तस्य लक्षणमेतत् लिंगादर्थप्रकाशनसामर्थ्यात् इदमर्थत्वं तत्का
र्यार्थत्वं न तु मंत्रसामान्यलक्षणमिदं अन्याप्त्यतिव्याप्त्यादिदोषप्रसक्तेः तस्माद्विशेषस्यैव

प्र· ९२ मंत्रस्य लक्षणं एवं च मंत्रशब्दो ह्यर्थः सामान्यार्थो विशेषार्थश्चेति भगवान् यत्रोपादिश्यते
कर्मकातुरंगं ननु त्यजते दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः यत्रादृष्टि यमो नोक्तो जपहो
मादिकर्मसु तिस्रस्तत्र दशाख्य शस्त्रा ऐंद्री सौम्या पराजिताः अपराजिता ऐशानी आसीन
ऊर्ध्वः प्रह्वो वा चानियमो यत्र नो अनेन दासीनेन कर्तव्यं न प्रह्वेन तिष्ठन् तथा अनादेशे
स्वयं कर्तास्य वैत्विक्षुरोहितः प्राकृतानां साधनानां प्राक्संस्थं च कर्मणां तथा अविज्ञानस्व
रा मंत्राः प्रयोक्तव्याः प्रयोक्तृभिः एकश्रुत्यैव होमेषु विज्ञातानाश्च विकल्पतः यस्मिन्मंत्रेण यदि
नः स्वाहाकारो भवेद्यदि स्वाहांतेन प्रयोक्तव्यो होमेषु प्रणवादिकः यत्र स्यात्तस्य चेशं तत्र राम ९२

चैवं होमशब्दयते कर्मंतेन च होतव्यं स्वाहाकारं पठेत्ततः जानीयात्सम्यक्चैवं मंत्रं तदन्यानु
पदेशतः ॐ भूर्भुवः स्वश्चेति तिस्रो व्याहृतयो जपे आभिश्च होमान्तिस्रभिश्चानुपरि
स्यात्समासतः अथ प्रयोगमंत्राणां पद्धिः लक्षणं स्मृतं जपानुमंत्रणाप्यायनाभि
मंत्रास्तथैव च उपस्थाकर्मकरणां च कृतो भुप्रयोगतः जपमुच्चारणं विद्यात्कृतार्थमाप
नद्भवेत् अर्थतः कार्यश्चेतना भिश्चेदर्थे एवकृतो भवेत् मंत्रानुच्चारयन्नेव मंत्रार्थत्वेन
संस्मरेत् शेषणं तन्मनाभूत्वा स्पादेतदनुमंत्रणं एतदेवाभिमंत्रणस्य लक्षणं वेक्षणा
धिकं अद्भिः संस्पर्शनाधिक्यात्तदेवाप्यायनं स्मृतं उपस्थानं तदेव स्यात्स्तवनं स्या

प्र० नसंभुतं वाग्यंवैर्यपदेनेषुकर्मकालेष्विमेषु तत्र कर्मणःकरणं तस्याविहितार्थप्रकाशनं
८३ मंत्रेण कृत्वा मंत्रांते क्रियते कर्मयोगस्तु तथा प्राजापत्यसुपांशुस्यात्सध्वंसावित्र्यमेव
च कृताकृतं ब्रह्मवरणं ब्रह्मा चाज्याभिघ्रसत्कृतिः संमार्गःस्रुवदर्व्योश्च आज्यभागौ प
रिस्तृतिः व्रीहीणामवघातश्च मंडलेन कृताकृतः द्वाविंशतयस्तस्यापि विलापन वि
धिस्तथेति अथावदिनं कर्मपवित्रपाणिः कुर्वीत तदाह हारीतः जपहोमहोराद्ये
ते असुरादयस्तपिणः पवित्रकृतहस्तस्याविद्रवंति दिशोदश अत्रिः उभाभ्यामपि
पाणिभ्यां विप्रैर्दर्भपवित्रकैः धारणीयं प्रयत्नेन ब्रह्मग्रंथिसमन्विते ब्रह्मग्रंथिल राम ८३

क्षणं गरुडपुराणे अस्त्यस्यावैश्लवो मानावव्रह्मग्रंथिविनिर्मितः स कृत्स्नदक्षिणाकृत्यपवि
त्रमभिधीयते तद्ब्रह्मग्रंथिमत्योक्तं पवित्रं वेदवेदिभिः पवित्रकर्तुरभिमुखवप्रदेशोब्र
ह्ममार्गः पवित्रदर्भसंख्या चतनैव सप्तभिः कुशापिंजलैः कुर्याद्ब्रह्मापवित्रकं पंचभिः
सविपस्यैव चतुर्भिस्तु तथा विशः द्वाभ्यां भद्रस्य विहितं मंतराणां तथैव च मार्कंडेयस्तु
चतुर्भिर्दर्भपिंजलैः ब्राह्मणस्य पवित्रकं एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं सर्वेषां
वा भवेद्वाभ्यां पवित्रं ग्रंथितं नवा त्रिभिस्तु शांतिकं कार्यं पौष्टिकं पंचभिस्तथा चतुर्भिर
भिचारार्थे कुर्वन्कुर्यात्पवित्रकं हेमपवित्रं विष्णुप्रशस्तमुक्तं हेमाद्रौ अन्यान्यपि पाव

प्र० आणिकुशदूर्वात्मकानि च हेमात्मकपवित्रस्यमेकां नार्हन्तिवैकलामिति द्रव्यभेदेनाहुति
६४ प्रमाणभेद उक्तः सिद्धान्तशेखरे कर्षप्रमाणमाज्यंस्यान्मधुक्षीरं च तत्समं तंडुलाना
शुक्तिमात्रं पायसं प्रसृतैः समं कर्षमात्राणि भक्ष्याणि लाजा मुष्टिमिता मताः अन्नं
ग्रासमसमं ग्राह्यं शाकं ग्रासार्धमात्रकं मूलानां तु विभागं स्यात्कंदानामष्टमोंशकः
इक्षुः पर्वप्रमाणं स्यादंगुलद्वितयं लता प्रादेशमात्राः समिधो ब्रीहीणां मंजरीसमा
तिलसक्तुकणादीनां मृगीमुद्राप्रमाणतः पत्रपुष्पफलानां तु स्वमानाहुतिरिष्यते
चंदनश्रीखंडकस्तूरीकुंकुमागरुकर्दमा हरिमंथस्वमाः प्रोक्तां गुग्गुलं बदरीसमः राम ६४

आहुतीनामिदं मानं कथितं वेदवेदिभिरिति हरिमंथश्चणकः मृगीमुद्रालक्षणमुक्तं
तत्रैव स्यात्त्रिमुद्रा मृगीमुद्रा होमे सर्वफलप्रदेति अरणिजन्यादेरग्नेरुत्तमादित्वमुक्तं
तत्रैव उत्तमोरणिजन्योग्निर्मध्यमः सूर्यकांतजः उत्तमश्रोत्रियागारान्मध्यमः स्वगृहा
द्विजः एतामग्निं ताम्रसौवर्णरजतादिपात्राभ्यां प्रणयेत् तथा च विः पात्रान्तरेणापि
हितेनाम्रपात्रादिके शुभे अग्निप्रणयनं कुर्यात्शरावेनादशोपवा आपस्तंबः नामो
क्षितमिंधानमग्नावादध्यात् बर्हिरर्थं कुशाभावे प्रतिनिधयः स्मृत्यर्थसारे बर्हिः काश
मयं ग्राह्यं न लभ्यं चेत्कुशाः पदा शरा शीरयपथ्या श्च वालमुंजार्जुनेक्षवः सुगंधितेजुना

प्र॰ दारुदूर्वाक्षीरद्रुमा अपि यद्वा सर्वेतृणेभ्योपि शस्तं बर्हिर्यथेप्सितं भुक्भुंस्कृत्त
८५ लं दुर्गंधितृणवर्जितं शातातपः शमित्कुशफलादानि ब्राह्मणः स्वयमाहरेत् शूद्रा
नीतैः क्रयक्रीतैः कर्म कुर्वन्व्रजत्यधः विष्णुः दर्शे श्रावणमासे तु सम्यङ्मंत्रोत्पाटिताः कु
शाः अयातयामास्ते स्युर्योनियोज्याः सर्वकर्मसु वर्षमिति शेषः कुशोत्पाटनमंत्रमा
ह कश्यपः शुचौ देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः ॐकारेणैव मंत्रेण कुशान्स्पृ
ष्ट्वा द्विजोत्तमः विरिंचिना सहोत्पन्नाः परमेष्ठिनिसर्गज नुद पापानि सर्वाणि दर्भ स्वस्ति
करो मम इमं मंत्रं समुच्चार्य ततः पूर्वोत्तरामुखः हुं फट्कारेण दर्भांस्तु सकृच्छित्वा स राम ८५

मुद्धरेत् हारीतः अच्छिन्नाग्रानविच्छिन्नांश्च समूलान्कोमलान्शुभान् पितृदेवद्विजार्थे हि
समादद्यात्कुशान्द्विजः इध्मवृक्षानाह मरीचिः पालाशः खादिरोश्वत्थः शमीवटउदुंबरः
अपामार्गोर्कदूर्वाश्च कुशाश्चेत्यपरे विदुः दशद्वादशवांगुल्यः समाः पंचदश स्मृताः नव
शुष्काः सत्वचा ह्यार्द्रा इध्मइहोत्तमः ब्रह्मपुराणे शमीपालाशन्यग्रोधप्लक्षवैकंकतोद्भ
वाः अश्वत्थोदुंबरो बिल्वचंदनः सरलस्तथा पालाशश्च देवदारुश्च खादिरश्चेति यज्ञियाः
दक्षिणायां विशेषउक्तो महाभारते वेदोपनयदे चैव सर्वकर्मसु दक्षिणा सर्वे चतुष्प्रयो
ज्याभ्रमिर्गावोथ कांचनं वैजावापः शिवनेत्रोद्भवं यस्मात्तस्मात्पितृवल्लभं अमं

प्र० ९६ गलंतघत्वेनदेवकार्येषुवर्जितं अन्यच्च यज्ञोपवीतेद्वेधार्येश्रौतेस्मार्तेचकर्मणि तृती
यामुत्तरीयार्थेवस्त्राभावेतदिष्यते सर्वोपवीतिनाभाव्यंसदाबद्धशिखेनच विशिखो
व्युपवीतिश्चयत्करोति नतत्कृतमिति अत्रपूर्वार्धेनसदाशब्दबलात्पुरुषार्थेना उत्त
रार्धेनविपर्ययनिंदाद्वारेणसशिखसोपवीताभ्यांकर्तव्यंकर्मेतिकीर्तनात्कर्मार्थेना
एवंचकर्मकालेशिखाबंधोपवीताभावेकर्मांगलोपनिमित्तंपुरुषार्थलोपनिमित्तं
चेतिप्रायश्चित्तद्वयंभवतिदर्शपूर्णमासयोरवान्तरवदने कर्मणोबहिस्तुपुरुषार्थ
लोपनिमित्तमेकमेवेतिविवेकः संग्रहे प्रभुःप्रथमकल्पस्ययोऽनुकल्पेनवर्तते स राम ९६

नाप्नोतिफलंतस्यपरत्रेतिश्रुतिःस्मृतिः यद्वल्यथास्वगृह्योक्तंयस्यकर्मप्रचोदितं तस्यता
वतिशास्त्रार्थेकृतोभवेत् कर्मविशेषेऽग्निनामानि पावकोलौकिकोह्यग्निःप्रथमःसंप्र
कीर्तितः अग्निस्तुमारुतोनामगर्भाधानेविधीयते ततःपुंसवनेज्ञेयःपवमानस्तथै
वच सीमंतेमंगलोनामप्रबलोजातकर्मणि नाम्निवैपार्थिवोह्यग्निःप्राशनेतुशुचिः
स्मृतः सभ्योनामसचैलेतुव्रतादेशेसमुद्भवः गोदानेसूर्यदोह्यग्निर्विवाहेयोजकोमतः
आवसथ्येभगोज्ञेयोवैश्वदेवेतुपावकः प्रायश्चित्तेविधुश्चैवपाकयज्ञेतुपाचकः देवा
नांहव्यवाहश्चपितॄणांकव्यवाहनः शांतिकेवरदःप्रोक्तःपौष्टिकेबलवर्धनः पूर्णाहु

प्र०
६१

त्यामौ लोनामकोधोग्निश्चाभिचारके वश्यार्थे कामदो नाम वनदाहे तु दूषकः कुक्षौ तु
जठरो ज्ञेयः क्रव्यादो मृतदाहने वह्निनामा लक्षहोमे कोटिहोमे हुताशनः समुद्रे वाड
वोग्निः क्षये संवर्त्तकस्तथा आह्निके गार्हपत्यश्च ईश्वरो दक्षिणस्तथा विहृताहवनी
यः स्यादग्निहोत्रेन योग्नयः ज्ञात्वैवमग्निनामानि गृह्यकर्म समारभेत् स्रुक्स्रुवार्थसा
रे बहुभुक्षेंधने वाग्नौ सुसमिद्धे विधूमके सागरे लेलिहाने च होतव्यं नान्यथा क्वचि
त् स्रुवस्रुगादिप्रकृतिवृक्षाः स्रुक्स्रुवार्थसारे जुहूः पालाश्युपभृदाश्वत्थी वैकङ्की
ध्रुवा यद्वा सर्वा स्रुचः कार्या एतेषामन्यवृक्षजाः शमीमय्यः स्रुचः कार्याः सर्वा वा भर्जवृ राम ६१

क्षजाः तदभावे यथालाभे मन्त्ययज्ञियवृक्षजाः खादिरस्तु स्रुवः कार्यः शम्याप्राशित्रमे
क्षणे खादिरो मुशलः कार्यः पालाशः स्यादुलूखलः यज्ञेभौ वारणौ कार्यौ न तदभावे न्यवृ
क्षजौ मुख्याभावे तु सदृशं द्रव्यं प्रतिनिधीयते यावद्यावत्सुसदृशं तत्तदेवाहि गृह्यते
संग्रहे प्रशस्तो पूर्णपात्रार्थे दारुकांस्यमधोमुखे खादिरेण स्रुवः कार्यः पालाशेन जु
हुयाद्यत् तद्देशाविलैरस्यामन्यैर्वा यज्ञियैर्द्रुमैः तदभावे पलाशस्य पर्णाभ्यां हूय
ते हवि पलाशपर्णाभावे तु पर्णैर्वा पिप्पलोद्भवैः पर्णपत्रमध्यमेन पर्णेन जुहोतीति
श्रुतेः चमसं वा प्रणीतापात्रं कांस्यपात्रमथापि वा चण्णाग्राकारः संग्रहे आयामं

प्र० यथाकृत्वाद्विभागंपात्रमुच्यते त्रिभागंदंडमित्याहुरेतदापामलक्षणं पात्रायामोर्धतः
९८ पात्रविस्तारश्चतदर्धतः ग्रीवाविस्तारतस्यार्धद्विलस्योच्छ्रायइष्यते विस्ताराद्द्विगुणं
पात्रंग्रीवाविस्तारमर्धतः अन्यानितुलक्षणानिविस्तारयेननोक्तानि तथा काम्येप्र
तिनिधिर्नास्तिनित्येनैमित्तिकेचसः काम्येष्वुपक्रमादूर्ध्वमन्येप्रतिनिधिंविदुः तस्मा
त्प्रतिनिधिमंत्रद्रव्यस्वामिदेवाग्निकर्मसु सदेशकालयोर्नास्तिनारणेरग्निरेवसा ना
भावस्यप्रतिविधिरभावांतरमिष्यते नापिप्रतिनिधातव्यंनिषिद्धंवस्तुकुत्रचिद राम
त्यादि तथा स्वकाकालादुत्तरोगौणःकालःसर्वस्यकर्मणः तथा कुशाद्भ्योदयो ९८

मंत्राब्राह्मणाश्चवहुश्रुताः नतेनिर्माल्यतांयांतिविनियोज्यांपुनःपुनः कुशाः
षट्सुतुनिर्माल्यादर्भोघाअभिचारके मंत्रास्तत्रचशूद्रार्थेब्राह्मणाःप्रेतभोजने
षट्सुतर्पणश्राद्धासनभोजनमूत्रपुरीषकालधारणेषु तत्राभिचारके कृतं
विहितंकर्मविष्णवार्पणंकार्यं तथाचवृहन्नारदीये विष्णवार्पितानिकर्माणिस
फलानिभवंतिहि अनर्पितानिकर्माणिभस्मानिन्यस्तहव्यवत् नित्यंनैमि
आदित्यं० सोमं० अंगारकं० बुधं० बृहस्पतिं० शुक्रं० शनैश्चरं० राहुं० केतुं०
अग्निं० अप० भूमिं० विष्णुं० इंद्राणीं० प्रजापतिं० इंद्राणीं० प्रजापतिं० सर्पां० ब्रह्माणं०
रुद्रं० गौरीं० स्कंदं० पुरुषं० ब्रह्माणं० इंद्रं० यमं० कालं० चित्रगुप्तं०॥

प्र० ६८ नैवकान्ययज्ञान्यान्मोक्षसाधनं विष्णोः समर्पितं सर्वं सात्विकं सफलं भवेत्
गीतायां यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौंतेय
तत्कुरुष्व मदर्पणमिति [illegible] इत्यादि एवमन्यापि परिभा
षा ज्ञेया इति श्रीमद्[illegible] हनुमन्नारायणभट्टकृते प्रयोगरत्ने
परिभाषाप्रकरणं॥ अथ गर्भाधानाद्याः संस्कारा उच्यंते॥ ॥ राम
[illegible] कुंडं [illegible] चतुर्भिः कुंडैः [illegible] चतुर्भिराढकस्य ६८
[illegible] चतुर्भिराढक [illegible] द्रोणस्य लक्षणं॥